CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuncripts Library

S.J.P.B.

Coll. No. 917

Title Daxiṇāmūrti stotra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 917 Subject : Stotra.

Title : Daxiṇāmūrti stotra.

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 6.6" by 3.5" Extent : 6 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : —

सांबःशिवो जयति ॥ विश्वं दर्प्पणदृश्यमानन
गरीतुल्यं निजांतर्गतं पश्यन्नात्मनि माय
या बहिरिवोद्भूतं यथा निद्रया ॥ यः सा
क्षात्कुरुते प्रबोधसमये स्वात्मानमेवा
द्वयं तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षि १

णामूर्तये ॥१॥ बीजस्यांतरिवांकुरो जग
दिदं प्राङ्निर्विकल्पं पुनर्मायाकल्पितदेशका
लकलनावैचित्र्यचित्रीकृतं। मायावीव वि
जृंभयत्यपि महायोगीव यः स्वेच्छया तस्मै श्री
गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥२॥

त्यकमसत्

यस्यैव स्फुरणं सदा[redacted]व कृत्यात्मकं भास
ते साक्षात्तत्त्वमसीति वेदवचसा यो बोध
यत्याश्रितान्॥ यत्साक्षात्करणाद्भवेन्न पु
नरावृत्तिर्भवांभोनिधौ तस्मै श्रीगुरुमू
र्तये नम इदं श्रीदक्षिणामूर्तये॥३॥ २

नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्व
रं ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः
स्पंदते॥ जानामीति तमेव भांतमनुभात्ये
तत्समस्तं जगत्तस्मै श्रीगुरुमूर्तये नम इदं
श्रीदक्षिणामूर्तये॥४॥ देहं प्राणमपींद्रि

याण्यपि चलां बुद्धिं च शून्यं विदुः स्त्रीबालांध
जडोपमास्त्वहमिति भ्रांता भृशं वादिनः ॥ मा
याशक्तिविलासकल्पितमहाव्यामोहसंसा
रिणे तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षि
णामूर्तये ॥५॥ राहुग्रस्तदिवाकरेंदुसद ३

पसंहरण
शो मायासमाच्छादनात्सन्मात्रः करणोतो योऽभू
त्सुषुप्तः पुमान् ॥ प्रागस्वाप्समिति प्रबोधसम
ये यः प्रत्यभिज्ञायते तस्मै श्रीगुरुमूर्तये न
म इदं श्रीदक्षिणामूर्तये ॥६॥ बाल्यादिष्वपि
जाग्रदादिषु तथा सर्वास्ववस्थास्वपि व्याव

स्वास्वनुवर्त्तमानमहमित्यंतः स्फुरंतं तथा
॥स्वात्मानं प्रकटीकरोति भजतां यो भद्रया
मुद्रया तस्मै श्रीगुरुमूर्त्तये नमइदं श्रीद
क्षिणामूर्त्तये॥७॥विश्वं पश्यति कार्यका ४
रणतया स्वस्वामिसंबंधतः शिष्याचार्य

तया तथैव पितृपुत्राद्यात्मनाभेदतः॥स्व
प्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामि
तस्तस्मै श्रीगुरुमूर्त्तये नमइदं श्रीदक्षि
णामूर्त्तये॥८॥भूरंभांस्यनलोनिलों
बरमहर्नाथो हिमांशुः पुमानित्याभा

ति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकं॥
नान्यत्किंचन विद्यते विमृशतां यस्मात्प
रस्माद्विभोस्तस्मै श्रीगुरुमूर्त्तये नम इदं
श्रीगुरुदक्षिणामूर्त्तये॥९॥ सर्वात्मत्वमि
ति स्फुटीकृतमिदं यस्मादमुष्मिस्तवे त

नास्य श्रवणात्तदर्थमननाद्ध्यानाच्च संकी
र्त्तनात्॥ सर्वात्मत्वमहाविभूतिसहितं स्या
दीश्वरत्वं स्वतः सिद्ध्येत्तत्पुनरष्टधापरि
णतं चैश्वर्यमव्याहतं॥१०॥ ॥इति दक्षि
णामूर्त्तिस्तोत्रं संपूर्णं॥ ॥ ॥ ॥

ॐ दक्षिणामूर्त्तिस्तोत्रं स्तोत्रवेस्ये